# Halasyesha Ashtakam

# हालास्येशाष्टकम्

## Document Information

Text title : Halasyeshashtakam

File name : hAlAsyeshAShTakam.itx

Category : shiva, aShTaka

Location : doc_shiva

Transliterated by : PSA Easwaran psaeaswaran at gmail.com

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Latest update : December 26, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 26, 2019

*sanskritdocuments.org*

Halasyesha Ashtakam

# हालास्येशाष्टकम्

शैलाधीशसुतासहाय सकलाम्नायान्तवेद्य प्रभो!
शूलोग्राग्रविदारितान्धक सुरारातीन्द्रवक्षस्थल ।
कालातीत! कलाविलास! कुशल त्रायेत ते सन्ततं
हालास्येश कृपाकटाक्षलहरी मामापदामास्पदम् ॥ १॥

कोलाच्छच्छद्मरूपमाधव सुरज्येष्ठातिदूराङ्घ्रिक!
नीलार्धाङ्ग! निवेशनिर्जरधुनीभास्वज्जटामण्डल!।
कैलासाचलवास! कार्मुकहर! त्रायेत ते सन्ततं
हालास्येश कृपाकटाक्षलहरी मामापदामास्पदम् ॥ २॥

फालाक्षिप्रभवप्रभञ्जनसख प्रोद्यत्स्फुलिङ्गच्छटा-
तूलानङ्गकचारुसंहनन सन्मीनेक्षणावल्लभ ।
शैलादिप्रमुखैर्गणैः स्तुतगुण त्रायेत ते सन्ततं
हालास्येश कृपाकटाक्षलहरी मामापदामास्पदम् ॥ ३॥

मालाकल्पितमालुधानफणसन्माणिक्यभास्वत्तनो
मूलाधार! जगत्त्रयस्य मुरजिन्नेत्रारविन्दार्चित ।
सालाकारभुजासहस्र! गिरिश! त्रायेत ते सन्ततं
हालास्येश कृपाकटाक्षलहरी मामापदामास्पदम् ॥ ४॥

बालादित्यसहस्रकोटिसदृशोद्यद्वेगवत्यापगा
वेलाभूमिविहारनिष्ठ! विबुधस्रोतस्विनीशेखर! ।
बालावर्ण्यकवित्वभूमिसुखद! त्रायेत ते सन्ततं
हालास्येश कृपाकटाक्षलहरी मामापदामास्पदम् ॥ ५॥

कीलालावनिपावकानिलनभश्चन्द्रार्कयज्वाकृते!
कीलानेकसहस्रसङ्कुलशिखिस्तम्भस्वरूपामित ।
चोळादीष्टगृहाङ्गनाविभवद! त्रायेत ते सन्ततं
हालास्येश कृपाकटाक्षलहरी मामापदामास्पदम् ॥ ६॥

लीलार्थाञ्जलिमेकमेव चरतां साम्राज्यलक्ष्मीप्रद!
स्थूलाशेषचराचरात्मक जगत्स्थूणाष्टमूर्ते! गुरो!।
तालाङ्कानुजफल्गुनप्रियकर! त्रायेत ते सन्ततं
हालास्येश कृपाकटाक्षलहरी मामापदामास्पदम् ॥ ७॥

हालास्यागतदेवदैत्यमुनिसङ्गीतापदानकण-
त्तूलाकोटिमनोहराङ्घ्रिकमलानन्दापवर्गप्रद ।
श्रीलीलाकर! पद्मनाभ! वरद! त्रायेत ते सन्ततं
हालास्येश कृपाकटाक्षलहरी मामापदामास्पदम् ॥ ८॥

लीलानादरमोहतः कपटतो यद्वा कदम्बाटवी-
हालास्याधिपतीष्टमष्टकमिदं सर्वेष्टसन्दोहनम् ।
आलापानफलान्विहाय सततं सङ्कीर्तयन्तीह ये
ते लाक्षार्द्रपदाबलाभिरखिलान् भोगान् लभन्ते सदा ॥ ९॥

इति श्रीहालास्येशाष्टकं सम्पूर्णम् ।

Encoded and proofread by PSA Easwaran psaeaswaran at gmail.com

*Halasyesha Ashtakam*

pdf was typeset on December 26, 2019

Please send corrections to *sanskrit@cheerful.com*